द्यूता०ठक्। गातागतिक यातायातनिष्पादिते त्रि०। पूर्वं गतं पश्चादागतम्। २पक्षिगतिभेदे जटाधरः। गम—कर्त्तरि क्त। कर्म्म०। पूर्वं गते पश्चादागते त्रि०। खगगतिशब्दे विवृतिः। आ+गम—क्तिन् गतोत्तरमागतिः। गतातदिरथत्र स्त्री। "जावालिरपि जानीते लोकस्यास्य गतागतिम्" रामा० अयो० ११०।

**गताध्वन्** त्रि० गतः अध्वा येन। १गतमार्गे २ज्ञाततत्त्वे च "गताध्वा छिन्नसंशयः" भा०शा०२२२अ०। स्त्रियां "डाबुभाभ्यामन्यतरस्याम्" पा०वा डाप्। सा च ३चतुर्दशीयुक्तामावास्यायां खर्विताशब्दे २४६९ पृ० कर्म्मप्रदीपवाक्यं दृश्यम्। "अमावास्यां कुर्वीत चन्द्रे दृश्यमानेऽप्येकदा गताध्वा भवतीति" गोपथब्रा० १।५।१०।

**गतानुगत** त्रि० गतस्य गमनस्यानुगतम् अनुगमनम्। १गमनानुरूपगमने। तेन निर्वृत्तं अक्षद्यूतादि०ठक्। गातानुगतिक गमनानुगमननिष्पन्ने त्रि०। गतानुगतमस्त्यस्य ठन्। गतानुगतिक तद्युक्ते त्रि० "गतानुगतिको लोको न लोकः पारमार्थिकः" पञ्चत०।

**गतान्त** त्रि० गत उपस्थितः अन्तः अन्तकालोऽस्य। १उपस्थितान्तकाले, मुमूर्षौ "मम वृद्धस्य कैकेयि! गतान्तस्य तपस्विनः" रामा० अ० १२।२०। गतः प्राप्तः अन्तो येन। २प्राप्तचरमसीमनि च।

**गतायुस्** त्रि० गतं गतप्रायमायुर्जीवनकालोऽस्य। १प्राप्तचरमकाले, गतायुर्लक्षणं सुश्रुतेनोक्तं यथा

"शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत्। तस्यारिष्टं समासेन व्यासतस्तु निबोध मे। शृणोति विविधान् शब्दान् यो दिव्यानामभावतः। समुद्रपूरमेघानामसम्पत्तौ च निःस्वनान्। तान् स्वनान्नावगृह्णाति मन्यते चान्यशब्दवत्। ग्राम्यारण्यस्वनांश्चापि विपरीतान् शृणोत्यपि। द्विषच्छब्देषु रमते सुहृच्छब्देषु कुप्यति। न शृणोति च योऽकस्मात्तं ब्रुवन्ति गतायुषम्। यस्तूष्णमिव गृह्णाति शीतमुष्णञ्च शीतवत्। सञ्जातशीतपिड़को यश्च दाहेन पीड्यते। उष्णगात्रोऽतिमात्रञ्च यः शीतेन प्रवेपते। प्रहाराञ्चाभिजानाति योऽङ्गच्छेदमथापि वा। पांशुनेवावकीर्णानि यश्च गात्राणि मन्यते। वर्णान्यभावराज्यो वा यस्य गात्रे भवन्ति हि। स्नातानुलिप्तं यञ्चापि भजन्ते नीलमक्षिकाः। सुगन्धिर्वाति योऽकस्मात्तं ब्रुवन्ति गतायुषम्। विपरीतेन गृह्णाति रसान् यश्चोपयोजितान्। उपयुक्ताः क्रमाद्यस्य रसा दोषाभिवृद्धये। यस्य दोषाग्निसाम्यञ्च कुर्य्युर्मिथ्योपयोजिताः। यो वा रसान्न संवेत्ति गतासुं तं प्रचक्षते। सुगन्धिं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्। गृह्णीते योऽन्यथा गन्धं शान्ते दीपे च नीरुजः। यो वा गन्धान्न जानाति गतासुं तं विनिर्दिशेत्। द्वन्द्वान्युष्णहिमादीनि कालावस्था दिशस्तथा। विपरीतेन गृह्णाति भावानन्यांश्च यो नरः। दिवाज्योतींषि यश्चापि ज्वलितानीव पश्यति। रात्रौ सूर्य्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसम्। अमेघोपप्लवे यश्च शक्रचापतडिद्गुणान्। तडित्वतोऽसितान् यो वा निर्म्मले गगने घनान्। विमानयानप्रासादैर्यश्च सङ्कुलमम्बरम्। यश्चानिलं मूर्त्तिमन्तमन्तरीक्षञ्च पश्यति। धूमनीहारवासोभिरावृतामिव मेदिनीम्। प्रदीप्तमिव लोकञ्च यो वा प्लुतमिवाम्भसा। भूमिमष्टापदाकारां लेखाभिर्यश्च पश्यति। न पश्यति सनक्षत्रां यश्च देवीमरुन्धतीम्। ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषम्। ज्योत्स्नादर्पणतोयेषु छायां यश्च न पश्यति। पश्यत्येकाङ्गहीनां वा विकृतां वाऽन्यसत्वजाम्। श्वकाककङ्कगृध्राणां प्रेतानां यक्षरक्षसाम्। पिशाचोरगनागानां भूतानां विकृतामपि। यो वा मयूरकण्ठाभं विधूमं वह्निमीक्षते। आतुरस्य भवेन्मृत्युः स्वस्थो व्याधिमवाप्नुयात्।" अधिकं कालचिह्नशब्दे १९९६ पृ० उक्तम्।

**गतार्त्तवा** स्त्री गतमार्त्तवं यस्याः। गतपञ्चाशद्वर्षवयस्कायां स्त्रियाम्। "द्वादशाद्वत्सरादूर्द्ध्वमापञ्चाशत्समं स्त्रियः। मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत्" भावप्र० तद्गतिकाल उक्तः। रोगादिना तन्मध्ये गतरजस्कायामपि जातवन्ध्यायां २स्त्रियाञ्च राजनि०।

**गतार्थ** त्रि० गतो ज्ञातोऽर्थो यस्य। ज्ञातार्थके पदार्थे "तदपि स्वलक्षणकथनेनैव गतार्थम्" सा० द०।

**गतासु** त्रि० गताः असवोऽस्य। १मृते २शवे "गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" गीता। ३गतप्रायप्राणके च सुश्रुतः गतायुःशब्दे दृश्यम्।

**गति** स्त्री गम—भावे क्तिन्। १गमने। "स्त्वय्येवास्ति मे गतिः" रघुः। "प्रणयातिभूमिमगमयत् गतिभिः" माघः। "उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः" किरा०। २परिणामे च "दुरधिगमा हि गतिः प्रयोजनानाम्" किरा०। "गतिः परिणामः" मल्लि०। ३ज्ञाने। करणे क्तिन्। ४प्रमाणे च। "अनेन